त्राद्रिस्य

श्रीमद्धक्रतुंडसरस्वतीगुरुभ्यो नमः ॥ अथ सर्वेषां शास्त्राणां श्रीभगवत्येव तात्पर्यं साक्षात्परंपरया चेति समासेन तेषां प्रस्थानभेदो निरूप्यते तथा हि ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति वेदाश्चत्वारः । शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति वेदांगानि षट् । पुराणन्यायमीमांसाधर्मशास्त्राणि चेति चत्वार्युपांगानि । अत्रोपपुराणानां पुराणेंतर्भावः । वैशेषिकशास्त्रस्य न्याये वेदांतशास्त्रस्य मीमांसायां । महाभारतरामायणयोः सांख्यपातंजलपाशुपतवैष्णवादीनां च धर्मशास्त्रे ॥ इति मिलित्वा चतुर्दश विद्याः तथा चोक्तं पुराणन्यायमीमांसाधर्मशास्त्रां सा गमिश्रिताः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश । इति । एता एव चतुर्भिरुपवेदैः सहिता अष्टादश विद्या भवंति । आयुर्वेदो धनुर्वेदो गांधर्ववेदोऽर्थशास्त्रं चेति चत्वार उपवेदाः । ता एता अष्टादश विद्यास्त्रयीसांख्य मिस्वनेन नस्तोके नोक्ताः । अन्यथा न्यूनतामसंगात् । सर्वेषां नास्तिकानामेतावत्येव शास्त्रप्रस्थानानि । अन्येषामप्येकदेशिनामेष्वेवांतर्भावात् । ननु नास्तिकानामपि प्रस्थानांतराणि संति । तान्येतेष्वनंतर्भावात्पृथग्गणयितुमुचितानि । तथा हि शून्यवादेनैकं प्रस्थानं माध्यमिकानां । क्षणिकविज्ञानमात्रवादेनापरं योगाचाराणां ॥

धौनु
व

ज्ञानाकारानुमेयक्षणिकबाह्यार्थवादेनापरं सौत्रान्तिकानां। प्रत्यक्षस्वलक्षणक्षणिकबाह्यार्थवादेनापरं वैभाषिकाणां
एवं सौगतानां प्रस्थानचतुष्टयं। तथा देहात्मवादेनैकं प्रस्थानं चार्वाकाणां। एवं देहातिरिक्तदेहपरिमाणात्मवा
देन द्वितीयं प्रस्थानं दिगंबराणां। एवं मिलित्वा नास्तिकानां षट् प्रस्थानानि॥ तानि कस्मान्नोच्यन्ते। सत्यं। वेदबा
ह्यत्वात्तेषां म्लेच्छादिप्रस्थानवत्परंपरयापि पुरुषार्थानुपयोगित्वादुपेक्षणीयत्वमेव। इह च साक्षाद्वा परंपरया वा
पुमर्थोपयोगिनां वेदोपकरणानामेव प्रस्थानानां भेदो दर्शितः। ततो न न्यूनत्वशंकावकाशः। अथ संक्षेपेण प्र
स्थानानां स्वरूपभेदहेतुः प्रयोजनभेद उच्यते बालानां व्युत्पत्तये। तत्र धर्मब्रह्मप्रतिपादकमपौरुषेयं प्र
माणवाक्यं वेदः। स च मन्त्रब्राह्मणात्मकः। तत्र मन्त्रा अनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकाः। ते पि त्रिविधाः
ऋग्यजुःसामभेदात्। तत्र पादबद्धा गायत्र्यादिच्छन्दोविशिष्टा ऋचः। अग्निमीळे पुरोहितमित्याद्याः। ता ए
व गीतिविशिष्टाः सामानि॥ तदुभयविलक्षणानि यजूंषि॥ अग्नीदग्नीन्विहर बर्हिः स्तृणाहीत्यादिसंबोधनरूपाणि
गदमन्त्रा अपि यजुरन्तर्भूता एव। तदेवं निरूपिता मन्त्राः। ब्राह्मणमपि त्रिविधं विधिरूपमर्थवादरूपं तदुभय
विलक्षणरूपं च॥ तत्र शब्दभावना विधिरिति भाट्टाः॥ नियोगो विधिरिति प्राभाकराः। इष्टसाधनं विधिरिति
तार्किकादयः। सर्वो विधिरपि चतुर्विधः। उत्पत्त्यधिकारविनियोगप्रयोगभेदात्॥ तत्र कर्मस्वरूपमात्रबोधको

विधिरुत्पत्तिविधिः। आग्नेयोऽष्टाकपालः पुरोडाशो भवतीत्यादिः। सेतिकर्तव्यताकस्य करणस्य यागादेः फलसंबं
धबोधको विधिरधिकारविधिः। यदर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिः। अङ्गसंबन्धबोधको विधिर्विनियो
गविधिः। व्रीहिभिर्यजेत समिधो यजतीत्यादिः। साङ्गप्रधानकर्मप्रयोगैक्यबोधको विधिः पूर्वोक्तविधित्रयमेलन
स्वपरे — रूपः प्रयोगविधिः। स च श्रौत इत्येके कल्प्य इत्यन्ये। कर्मस्वरूपं च द्विविधं गुणकर्म अर्थकर्म च। तत्र क्रतुकारका
ण्याश्रित्य विहितं गुणकर्म। तदपि चतुर्विधं उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात्। तत्र वसन्ते ब्राह्मणोऽग्नीनादधी
त यूपं तक्षतीत्यादौ आधानतक्षणादिना संस्कारविशेषविशिष्टाग्नियूपादेरुत्पत्तिः। स्वाध्यायोऽध्येतव्यः। गां प
यो दोग्धीत्यादौ अध्ययनदोहनादिना विद्यमानस्यैव स्वाध्यायपयःप्रभृतेः प्राप्तिः। सोममभिषुणोति व्रीहीन
वहन्ति आज्यं विलापयतीत्यादौ अभिषवावघातविलापनैः सोमादीनां विकारः। व्रीहीन्प्रोक्षति पत्न्याज्यम
वेक्षत इत्यादौ प्रोक्षणावेक्षणादिभिर्व्रीह्यादिद्रव्याणां संस्कारः। एतच्चतुष्टयं चाङ्गमेव। तथा क्रतुकारकाण्याश्रित्य
विहितमर्थकर्म। तच्च द्विविधं अङ्गं प्रधानं च। अन्यार्थमङ्गम्। अनन्यार्थं प्रधानम्। अङ्गमपि द्विविधं सन्निपत्यो
पकारकमारादुपकारकं च। तत्र प्रधानस्वरूपनिर्वाहकं प्रथमं फलोपकारि द्वितीयम्। एवं संपूर्णाङ्गयुक्तो विधिः
प्रकृतिः। विकलाङ्गयुक्तो विधिर्विकृतिः। तदुभयविलक्षणो विधिर्दर्वीहोमः। एवमन्यदप्यूह्यम्। तदेवं नि

२

रूपितो विधिभागः॥ प्राशस्त्यनिंदान्यतरलक्षणया विधिशेषभूतं वाक्यमर्थवादः॥ सच त्रिविधः। गुणवादोऽनु
वादो भूतार्थवादश्चेति। तत्र प्रमाणांतरविरुद्धार्थबोधको विधि गुणवादः। आदित्यो यूप इत्यादिः। प्रमाणांतर
प्राप्तार्थबोधकोऽनुवादः अग्निर्हिमस्य भेषजमित्यादिः। प्रमाणांतरविरोधतत्प्राप्तिरहितार्थबोधको भूतार्थ
वादः। इंद्रो वृत्राय वज्रमुदयछदित्यादिः॥ तदुक्तं। विरोधे गुणवादः स्यादनुवादोऽवधारिते॥ भूतार्थवादस्तद्धाना
दर्थवादस्त्रिधा मतः इति॥ तत्र त्रिविधानामप्यर्थवादानां स्तुतिपरत्वे समानेऽपि भूतार्थवादानां स्वार्थेऽपि प्रामाण्यं।
देवताधिकरणन्यायात्। अबाधिताज्ञातज्ञापकत्वं प्रामाण्यं॥ न च बाधितविषयत्वात् ज्ञातज्ञापकत्वाच्च न
गुणवादानुवादयोः भूतार्थवादस्य तु स्वार्थतात्पर्यरहितस्याप्यौत्सर्गिकं प्रामाण्यं न विहन्यते। तदेवं निरूपि
तोऽर्थवादभागः॥ विध्यर्थवादोभयविलक्षणं तु वेदांतवाक्यं। तच्चाज्ञातज्ञापकत्वेऽप्यनुष्ठानाप्रतिपादकत्वा
न्न विधिः। स्वतः पुरुषार्थपरमानंदज्ञानात्मकब्रह्मसिद्धिस्वार्थे उपक्रमोपसंहारादिषड्विधतात्पर्यलिंगवत्तया
शुद्धि स्वतः प्रमाणं तत्सर्वानपि विधीनेतः करणद्वारा स्वशेषतामापादयदन्यशेषताभावाच्च नार्थवादः। तस्मा
दुभयविलक्षणमेव वेदांतवाक्यं। तच्च केचिदज्ञातज्ञापकत्वमात्रेण विधिरिति व्यपदिश्यते। विधिपदर
हितत्वेन केचिद्भूतार्थवादमात्रेण व्यवह्रियत इति न दोषः। तदेवं निरूपितं त्रिविधं ब्राह्मणं। एवं च कर्मकां

डब्रह्मकांडात्मको वेदो धर्मार्थकाममोक्षहेतुः॥ स च प्रयोगत्रयेण यज्ञनिर्वाहार्थं ऋग्यजुःसामभेदेन भिन्नः। तत्र
होत्रप्रयोगो ऋग्वेदेन। आध्वर्यवप्रयोगो यजुर्वेदेन। औद्गात्रप्रयोगः॥ ब्रह्मयजमानप्रयोगौ त्वत्रैवान्तर्भूतौ। अथ
र्ववेदस्तु यज्ञानुपयुक्तः। शांतिपौष्टिकाभिचारिककर्मप्रतिपादकत्वेनात्यंतविलक्षण एव। एवं प्रवचनभेदा
त्प्रतिवेदं भिन्ना बह्व्यः शाखाः। एवं च कर्मकांडे व्यापारभेदेपि सर्वासां वेदशाखानामेकरूपत्वमेव ब्रह्म
कांड इति भेदेन प्रयोजनभेदेन चतुर्णां वेदानां भेद उक्तः। अथांगानामुच्यते। तत्र शिक्षाया उदात्तानुदात्तस्व
रितह्रस्वदीर्घप्लुतादिविशिष्टस्वरव्यंजनात्मकवर्णोच्चारणविशेषज्ञानं प्रयोजनं। तदभावे मंत्राणामनर्थ
कत्वात्। तथा चोक्तं। मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोपराधात्। तत्र सर्ववेदसाधारणी शिक्षा। अथ शिक्षां प्रवक्ष्यामीत्यादि पंचखंडात्मिका
पाणिनिना प्रकाशिता। प्रतिशाखं च भिन्नरूपा प्रातिशाख्यसंज्ञिता अन्यैरेव मुनिभिः प्रदर्शिता। एवं वैदि
कपदसाधुत्वज्ञानेनोहापोहादिकं व्याकरणस्य प्रयोजनं। तच्च वृद्धिरादैजित्यादिनाध्यायाष्टकं पाणिनिनाम
हेश्वरप्रसादेन भगवता पाणिनिना प्रकाशितं। तत्र कात्यायनेन मुनिना पाणिनीयसूत्रेषु वार्तिकं विरचि
तं तद्वार्तिकोपरि भगवता पतंजलिना महाभाष्यमारचितं। तदेतत् त्रिमुनिव्याकरणं वेदांगं माहेश्वरमि

३

स्याख्यायते। कौमारादिव्याकरणानि तु न वेदांगानि किं तु लौकिकप्रयोगमात्रज्ञानार्थानीत्यवगंतव्यं। एवं व्या-
शिक्षाव्याकरणाभ्यां वर्णोच्चारणपदसाधुत्वे ज्ञाते वैदिकमंत्रपदानामर्थज्ञानाकांक्षायां तदर्थं भगवता
यास्केन समाम्नायः समाम्नातः स व्याख्यातो भवतामित्यादित्रयोदशाध्यायात्मकं निरुक्तमारचितं।
तत्र च नामाख्यातनिपातोपसर्गभेदेन चतुर्विधं पदजातं निरूप्य वैदिकमंत्रपदानामर्थः प्रकाशितः।
मंत्राणां चानुष्ठेयार्थप्रकाशनद्वारेणैवोपकरणत्वात्। पदार्थज्ञानाधीनत्वाच्च वाक्यार्थज्ञानस्य मंत्र-
स्य पदार्थज्ञानाय निरुक्तमवश्यमपेक्षितं। अन्यथानुष्ठानासंभवात्। [illegible] रैयेवजार्भूरीतु पैरीत
इत्यादिदुरूहाणां प्रकाशमंत्रेणार्थज्ञानस्यासंभावनीयत्वाच्च। एवं निघंटवोऽपि वैदिकद्रव्यदेवतात्मकप-
दार्थपर्यायशब्दात्मका निरुक्तांतर्भूता एव। तत्रापि निघंटुसंज्ञकः पंचाध्यायात्मको ग्रंथो भगवता यास्के-
नैव कृतः। एवं मंत्राणां पादबद्धछंदोविशेषविशिष्टत्वात्तदज्ञाने च निंदाश्रवणाच्छंदोविशेषनिमि-
त्तानुष्ठानविशेषविधानाच्च छंदोज्ञानाकांक्षायां तत्प्रकाशनाय धीश्रीस्त्रीमित्याद्यष्टाध्यायात्मिका छंदो-
विवृतिर्भगवता पिंगलेन विरचिता। तत्राथ लौकिकमित्यतेनाध्यायत्रयेण गायत्र्युष्णिगनुष्टुब्बृ-
हतीपंक्तित्रिष्टुब्जगतीसप्तछंदांसि सावांतरभेदानि निरूपितानि। अथ लौकिकमित्यारभ्याध्या-

य

यथा पंचकेन पुराणेतिहासादावुपयोगीनि श्लोकविकानि छंदांसि भगवता पिंगलेन निरूपितानि। व्याकरणेन लौकिकपदनि-
रूपणवत्। एवं वैदिककर्मांगदर्शादिकालज्ञानाय ज्योतिषं भगवतादित्येन गर्गादिभिश्च प्रणीतं। बहुविधमेव।
एवं शाखांतरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषज्ञानाय कल्पसूत्राणि। तानि च त्रयीमयोगेत्रयभेदा-
त्त्रिविधानि। तत्र हौत्रप्रयोगप्रतिपादकानि आश्वलायनसांख्यायनादिप्रणीतानि। आध्वर्यवप्रयोगप्रति-
पादकानि बौधायनकात्यायनादिप्रणीतानि। औद्गात्रप्रयोगप्रतिपादकानि लाट्यायनादिप्रणीतानि। एवं नि-
रूपितः षण्णामंगानां प्रयोजनभेदः। चतुर्णामुपांगानामथोच्यते। तत्र सर्गप्रतिसर्गवंशमन्वंतरवंश्यानु-
चरितप्रतिपादकानि भगवता बादरायणेन कृतानि पुराणानि। तानि च ब्राह्मपाद्मवैष्णवशैवभागवतना-
रदीयमार्कंडेयमाग्नेयभविष्यब्रह्मवैवर्तलैंगवाराहस्कांदवामनकौर्ममात्स्यगारुडब्रह्मांडाख्यान्यष्टादश।
आद्यं सनत्कुमारेणोक्तं वेदविदांवरः। द्वितीयं नारसिंहाख्यं तृतीयं नांदमेव च। चतुर्थं शिवधर्माख्यं दौर्वासं प-
चमं विदुः। षष्ठं तु नारदीयाख्यं कापिलं सप्तमं विदुः। अष्टमं मानवं प्रोक्तं ततश्चौशनसेरितं। ततो ब्रह्मांडसंज्ञं
तु वारुणाख्यमतः परं। ततः कालीपुराणाख्यं वासिष्ठं मुनिपुंगवाः। ततो वाशिष्ठलैंगाख्यं प्रोक्तं माहेश्वरं प-
रं। ततः सांबपुराणाख्यं ततः सौरं महाद्भुतं। पाराशरं ततः प्रोक्तं मारीचाख्यं ततः परं। भार्गवाख्यं ततः प्रोक्तं

सर्वविधमोक्षसाधकं। एवमुपपुराणान्यनेकप्रकाराणि द्रष्टव्यानि। न्याय आन्वीक्षिकी पंचाध्यायी गोतमेन प्रणी
ता। प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजाति
निग्रहस्थानाख्यानां षोडशपदार्थानामुद्देशलक्षणपरीक्षाभिस्तत्त्वज्ञानं तस्याः प्रयोजनं। एवं दशाध्यायी वै
शेषिकशास्त्रं कणादेन प्रणीतं। द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां अभावसप्तमानां
साधर्म्यवैधर्म्याभ्यां व्युत्पादनं तस्य प्रयोजनं। एतदपि न्यायपदेनोक्तं। एवं मीमांसापि द्विविधा। कर्ममीमां
सा शारीरकमीमांसा च। तत्र द्वादशाध्यायी कर्ममीमांसा। अथातो धर्मजिज्ञासेत्याद्यन्वाहार्ये च दर्शनादित्यं
ता च भगवता जैमिनिना प्रणीता। तत्र धर्मप्रमाणं। धर्मभेदाभेदौ। शेषशेषिभावः। प्रयोज्यप्रयोजकभावः। क्र
मः। अधिकारनिरूपणं। सामान्यातिदेशः। विशेषातिदेशः। ऊहः। बाधः। तंत्रं। प्रसंगश्चेति क्रमेण द्वादशाध्या
यानामर्थाः। तथा संकर्षणकांडमप्यध्यायचतुष्टयात्मकं जैमिनिना प्रणीतं। तच्च देवताकांडसंज्ञया प्रसिद्धमु
पासनाख्यकर्मप्रतिपादकत्वात्कर्ममीमांसांतर्गतमेव। तथा चतुरध्यायी शारीरकमीमांसा। अथातो ब्रह्मजि
ज्ञासेत्यादि अनावृत्तिः शब्दादनावृत्तिः शब्दादित्यंता जीवब्रह्मैकत्वसाक्षात्कारहेतुविचारप्रतिपादकान्न्या
यानुपदर्शयंती भगवता बादरायणेन कृता। तत्र सर्वेषामपि वेदान्तवाक्यानां साक्षात्परंपरया वा प्रत्यगभि

न्नाद्वितीये ब्रह्मणि तात्पर्यमिति समन्वयः प्रथमाध्यायेन दर्शितः। तत्र प्रथमे पादे स्पष्टब्रह्मलिंगयुक्तानि
वाक्यानि विचारितानि। द्वितीये पादे त्वस्पष्टब्रह्मलिंगान्युपास्यब्रह्मविषयाणि। तृतीये पादे ऽस्पष्टब्रह्मलिंगा
नि प्रायशो ज्ञेयब्रह्मविषयाणि। एवं पादत्रयेण वाक्यविचारः समापितः। चतुर्थपादे तु प्रधानविषयत्वेन संदि
ह्यमानान्यव्यक्ताजादिपदानि चिंतितानि। एवं वेदांतानामद्वये ब्रह्मणि सिद्धे समन्वये तत्र संभावितस्मृति
तर्कादिविरोधमाशंक्य तत्परिहारः क्रियत इत्यविरोधो द्वितीयाध्यायेन दर्शितः। तत्राद्यपादे सांख्ययोगकाणादा
दिस्मृतिभिः सांख्यादिप्रयुक्तैस्तर्कैश्च विरोधो वेदांतसमन्वयस्य परिहृतः। द्वितीये पादे सांख्यादिमतानां दुष्ट
त्वं प्रतिपादितं। स्वपक्षस्थापनपरपक्षनिवारणरूपपर्वद्वयात्मकत्वाद्विचारस्य। तृतीये पादे महाभूतसृष्ट्या
दिश्रुतीनां परस्परविरोधः परिहृतः। उत्तरभागेन तु जीवविषयाणां। चतुर्थपादे इंद्रियविषयश्रुतीनां वि
रोधपरिहारः। तृतीयेऽध्याये साधननिरूपणं। तत्र प्रथमे पादे जीवस्य परलोकगमनागमने निरूप्य वैरा
ग्यं निरूपितं। द्वितीये पादे पूर्वभागेन त्वंपदार्थः शोधितः। उत्तरभागेन तत्पदार्थः। तृतीये पादे निर्गुणे ब्र
ह्मणि नानाशाखापठितपुनरुक्तपदोपसंहारः कृतः। प्रसंगाच्च सगुणविद्यासु शाखांतरीयगुणोपसं
हारोपसंहारो निरूपितः। चतुर्थे पादे निर्गुणब्रह्मविद्याया बहिरंगसाधनान्याश्रमयज्ञादीन्यंतरीयसाध

नानि शमदमनिदिध्यासनादीनि च निरूपितानि। चतुर्थेऽध्याये सगुणनिर्गुणविद्ययोः फलविशेषनिर्णयः कृ-
तः। तत्र प्रथमपादे श्रवणाद्यावृत्त्या निर्गुणं ब्रह्मोपासनावृत्त्या सगुणं ब्रह्म वा साक्षात्कृत्य जीवतः पापपुण्या-
लेपलक्षणा जीवन्मुक्तिरभिहिता। द्वितीये पादे म्रियमाणस्योत्क्रान्तिप्रकारश्चिन्तितः। तृतीये पादे सगुण-
ब्रह्मविदो मृतस्योत्तरो मार्गोऽभिहितः। चतुर्थे पादे पूर्वभागेन निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिरुक्ता।
तदुत्तरभागेन सगुणब्रह्मविदो ब्रह्मलोकस्थितिरुक्तेति। इदमेव सर्वशास्त्राणां मूर्धन्यं शास्त्रान्तरं सर्वमस्यै-
व शेषभूतमितीदमेव मुमुक्षुभिरादरणीयं श्रीशंकरभगवत्पादोदितप्रकारेणेति रहस्यं। एवं धर्मशा-
स्त्राण्यपि मनुयाज्ञवल्क्यविष्णुयमांगिरोवशिष्ठदक्षसंवर्तशातातपपराशरगौतमशंखलिखितहारीतापस्त-
म्बोशनोव्यासकात्यायनबृहस्पतिदेवलनारदपैठीनसिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां
विभागेन प्रतिपादकानि। एवं व्यासकृतं महाभारतं वाल्मीकिकृतं रामायणं च धर्मशास्त्रमध्य एवान्तर्भूतं। स्व-
पमितिहासत्वेन प्रसिद्धं। सांख्यादीनां धर्मशास्त्रान्तर्भावेऽपीह स्वशब्देनैव निर्देशात्पृथगेव संगतिर्वाच्या।
अथ उपवेदचतुष्टयस्य क्रमेण चत्वार उपभेदाः। तत्रायुर्वेदस्याष्टौ स्थानानि भवन्ति। सूत्रं शारीरमै-
न्द्रियं चिकित्सा निदानं विमानं विकल्पः सिद्धिश्चेति। ब्रह्मप्रजापत्यश्विधन्वन्तरीन्द्रभरद्वाजात्रेयाग्निवेश्या

र्षिभिरप्यादिकल्पान्तरे कोटिसंक्षिप्तः। तत्रैव सुश्रुतेन पंचस्थानात्मकमस्यान्तरं कृतं। एवं वाग्भट्टादिभिरपि बहुधे
ति न शास्त्रभेदः। कामशास्त्रमप्यायुर्वेदान्तर्गतमेव। सुश्रुतेन वाजीकरणाख्यकामशास्त्राभिधानात्। तत्र वात्स्या
यनेन पंचाध्यायात्मकं कामशास्त्रं संक्षिप्तं। तस्य च विषयवैराग्यमेव प्रयोजनं। शास्त्रोद्दीपितमार्गेणापि विषयभो
गे दुःखमात्रपर्यवसानात्। चिकित्साशास्त्रस्य रोगनिवृत्तिस्तत्साधनज्ञानं प्रयोजनं। एवं धनुर्वेदः पादचतुष्ट
यात्मकः। विश्वामित्रप्रणीतः। तत्र प्रथमो दीक्षापादः। द्वितीयः संग्रहपादः। तृतीयः सिद्धिपादः। चतुर्थः प्रयोग
पादः। तत्र प्रथमे पादे धनुर्लक्षणं अधिकारिनिरूपणं च कृतं। तत्र धनुःशब्दश्चापे रूढोपि चतुर्विधायुधे प्र
वर्तते। तच्चातुर्विध्यमेवं। मुक्तममुक्तं मुक्तामुक्तं यंत्रमुक्तं। मुक्तं चक्रादि अमुक्तं खड्गादि मुक्तामुक्तं शल्या
वांतरभेदादि तत्र मुक्तमस्त्रमित्युच्यते। तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादिभेदादनेकविधं। एवं
साधिदैवतेषु समंत्रकेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनां च ते सर्वेपि चतुर्विधाः
पदातिरथगजतुरगारूढाः। दीक्षाभिषेकशाकुनमंगलकरणादिकं च सर्वमपि प्रथमे पादे निरूपितं। सर्वे
षां चास्त्रविशेषाणामाचार्यस्य च लक्षणपूर्वकं संग्रहणप्रकारो दर्शितः। द्वितीयपादे गुरुसंप्रदायसिद्धानां
शस्त्रविशेषाणां पुनः पुनरभ्यासो मंत्रदेवतासिद्धिकरणमपि निरूपितं। तृतीयपादे एवं देवतार्चनाभ्यासादिभिः

सिद्धीनामर्थविशेषाणां प्रयोगश्चतुर्थपादे निरूपितः। क्षत्रियाणां स्वधर्माचरणं युद्धं दुष्टदस्युचोरादिभ्यः
प्रजापालनं च धनुर्वेदस्य प्रयोजनं। एवं च ब्रह्मप्रजापत्यादिक्रमेण विश्वामित्रप्रणीतं धनुर्वेदशास्त्रं। एवं
गांधर्ववेदशास्त्रं भगवता भरतेन प्रणीतं। तत्र गीतनृत्यवाद्यभेदेन बहुविधोर्थः। देवताराधननिर्विकल्पसमा
ध्यादिसिद्धिश्च गांधर्ववेदस्य प्रयोजनं। एवमर्थशास्त्रं च बहुविधं नीतिशास्त्रमश्वशास्त्रं शिल्पशास्त्रं सूप
कारशास्त्रं चतुःषष्टिकलाशास्त्रं चेति नानामुनिभिः प्रणीतं तत्सर्वं। तस्य च सर्वस्य लौकिकतत्प्रयोजनभे
दो द्रष्टव्यः। एवमष्टादशविद्यास्त्रयीशब्देनोक्ताः। अन्यथा न्यूनताप्रसंगात्। तथा सांख्यशास्त्रं भगवता
कपिलेन प्रणीतं। अथ त्रिविधदुःखाभावोत्यंतपुरुषार्थ इति षडध्यायी। तत्र प्रथमेध्याये विषया निरूपिताः।
द्वितीयेध्याये प्रधानकार्याणि। तृतीयेध्याये विषयेभ्यो वैराग्यं। चतुर्थेध्याये विरक्तानां पिंगलाकुररादीनामा
ख्यायिकाः। पंचमेध्याये परपक्षनिर्जयः। षष्ठे सर्वार्थसंक्षेपः। प्रकृतिपुरुषविवेकज्ञानं सांख्यशास्त्रस्य प्र
पतंजलिना योजनं। तथा योगशास्त्रं भगवता प्रणीतं। अथ योगानुशासनमित्यादि पादचतुष्टयात्मकं। तत्र प्रथ
मे पादे चित्तवृत्तिनिरोधात्मकः समाधिरभ्यासवैराग्यरूपं च तत्साधनं निरूपितं। द्वितीये पादे विक्षिप्तचित्तस्या

पि समाधिसिद्ध्यर्थं यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो योगाङ्गानि निरूपितानि। तृतीय
पादे योगविभूतयः। चतुर्थपादे कैवल्यमिति। तस्य च विजातीयप्रत्ययनिरोधद्वारेण निदिध्यासनसिद्धिः प्रयो
जनं। तथा पशुपतिमतं पाशुपतशास्त्रं भगवता पशुपतिना पशुपाशविमोक्षणायाभिहितं। अथातः पा
शुपतं योगविधिं व्याख्यास्यामः इत्यादि पंचाध्यायं विरचितं। तत्राध्यायपंचकेनापि कार्यरूपो जीवः कारणप
तिरीश्वरः योगः पशुपतौ चित्तसमाधानं। विधिर्भस्मना त्रिषवणस्नानादिर्निरूपितः। दुःखान्तसंज्ञो मोक्षश्च
प्रयोजनं। एत एव कार्यकारणयोगविधिदुःखान्ता इत्याख्यायंते॥ एवं वैष्णवं नारदादिकृतं पंचरात्रं। तत्र वासु
देवसंकर्षणप्रद्युम्नानिरुद्धाश्चत्वारः पदार्था निरूपिताः। भगवान्वासुदेवः सर्वकारणं परमेश्वरः।
तस्मादुत्पद्यते संकर्षणाख्यो जीवः। तस्मान्मनः प्रद्युम्नः। तस्मादनिरुद्धोऽहंकारः। सर्वे चैते भगवतो वासुदेव
स्यैवांशभूतास्तदभिन्ना एव। इति भगवतो वासुदेवस्य मनोवाक्कायवृत्तिभिराराधनं कृत्वा कृतकृत्यो भ
वतीत्यादि च निरूपितं। तदेवं दर्शितः प्रस्थानभेदः। सर्वेषां च संक्षेपेण त्रिविध एव प्रस्थानभेदः। तत्रारंभ
वाद एकः। परिणामवादो द्वितीयः। विवर्तवादस्तृतीयः। पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाण
वो द्व्यणुकादिक्रमेण ब्रह्माण्डपर्यंतं जगदारभंते। असदेव कार्यं कारणव्यापारादुत्पद्यत इति प्रथमस्तार्किका

13

शिवोयमेव
७

कांरणं। मीमांसकानां च। सत्त्वरजस्तमोगुणात्मकं प्रधानमेव महदहंकारादिक्रमेण जगदाकारेण परिणमते।
पूर्वमपि सूक्ष्मरूपेण सदेव कार्यं कारणव्यापारेणाभिव्यज्यत इति द्वितीयः पक्षः सांख्ययोगपाशुपतानां। ब्र
ह्मणः परिणामो जगदिति वैष्णवानां। स्वप्रकाशपरमानंदाद्वितीयं ब्रह्म स्वमायावशान्मिथ्यैव जगदाकारे
ण विवर्त इति तृतीयः पक्षो ब्रह्मवादिनां। सर्वेषां प्रस्थानकर्तॄणां मुनीनां विवर्तवादपर्यवसानेनाद्वितीये प
रमेश्वर एव वेदांतप्रतिपाद्ये तात्पर्यं। न हि ते मुनयो भ्रांताः सर्वज्ञत्वात्तेषां। किंतु बहिर्विषयप्रवणानामा
पाततः पुरुषार्थप्रवेशो न संभवतीति नास्तिक्यनिवारणाय तैः प्रकारभेदाः प्रदर्शिताः। तत्र तेषां तात्प
र्यमबुध्वा वेदविरुद्धेप्यर्थे तात्पर्यमुत्प्रेक्षमाणास्तत्तन्मतमेवोपादेयत्वेन गृह्णंतो जना नाना ऋजुकुटि
ना लनानापथजुषो भवंतीति न सर्वेषां ऋजुमार्ग एव प्रवेशो न वा पर्यवसानेपि परमेश्वरे साभिरतः। परंपराशु
द्धिवशेन पश्चाद्दृढमार्गाश्रयणादेवेत्यर्थः। हरियसे पेवा ॥ इति श्रीमधुसूदनसरस्वती विरचितप्र
स्थानभेदः ॥ श्रीपरमेश्वरार्पणमस्तु॥ इदं च लिखितं विठ्ठलेन गणेशमेवं। इमेति नाम्नि वत्स
रे मध्वशितपंचम्यां गुरुवासरे लेखनमिदं समाप्तं॥ श्रीहेवाधिदेवाय साबायसांकुटुंबिनेनमोस्तु॥